# Shri Mahakala Stotram

# શ્રીમહાકાલસ્તોત્રમ્

## Document Information

```
Text title : mahAkAlastotram
File name : mahAkAlastotram.itx
Category : shiva
Location : doc_shiva
Latest update : April 27, 2019
Send corrections to : sanskrit@cheerful.com
```

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# શ્રીમહાકાલસ્તોત્રમ્

દૃષ્ટ્વા દેવં મહાકાલં કાલિકાઙ્ગં મહાપ્રભુમ્ ।
ભાર્ગવઃ પતિતો ભૂમૌ દણ્ડવત્સુરપૂજિતે ॥ ૧॥

ભાર્ગવ ઉવાચ
કલ્પન્તકાલાગ્નિસમાનભાસં ચતુર્ભુજં કાલિકયોપજુષ્ટમ્ ।
કપલખટ્વાઙ્ગવરાભયાઢ્યકરં મહાકાલમનન્તમીડે ॥ ૨॥

નમઃ પરમરૂપાય પરામલસુરૂપિણે ।
નિયતિપ્રાપ્તદેહાય તત્ત્વરૂપાય તે નમઃ ॥ ૩॥

નમઃ પરમરૂપાય પરમાર્થૈકરૂપિણે ।
વિયન્માયાસ્વરુપાય ભૈરવાય નમોઽસ્તુતે ॥ ૪॥

ૐ નમઃ પરમેશાય પરતત્ત્વાર્થદર્શિણે ।
વિયન્માયાદ્યધીશાય ધીવિચિત્રાય શમ્ભવે ॥ ૫॥

ત્રિલોકેશાય ગૂઢાય સૂક્ષ્માયાવ્યક્તરૂપિણે ।
પરાકાષ્ઠાદિરૂપાય પરાય શમ્ભવે નમઃ ॥ ૬॥

ૐ નમઃ કાલિકાઙ્ગાય કાલાઞ્જનનિભાય તે ।
જગત્સંહારકર્ત્રે ચ મહાકાલાય તે નમઃ ॥ ૭॥

નમ ઉગ્રાય દેવાય ભીમાય ભયદાયિને ।
મહાભયવિનાશાય સૃષ્ટિસંહારકારિણે ॥ ૮॥

નમઃ પરાપરાનન્દસ્વરૂપાય મહાત્મને ।
પરપ્રકાશરૂપાય પ્રકાશાનાં પ્રકાશિને ॥ ૯॥

ૐ નમો ધ્યાનગમ્યાય યોગિહૃત્પદ્મવાસિને ।
વેદતન્ત્રાર્થગમ્યાય વેદતન્ત્રાર્થદર્શિને ॥ ૧૦॥

વેદાગમપરામર્શપરમાનન્દદાયિને ।

તન્ત્રવેદાન્તવેદ્યાય શમ્ભવે વિભવે નમઃ ॥ ૧૧॥

ધિયાં પ્રચોદકં યત્તુ પરમં જ્યોતિરુત્તમમ્ ।
તત્પ્રેરકાય દેવાય પરમજ્યોતિષે નમઃ ॥ ૧૨॥

ગુણાશ્રયાય દેવાય નિર્ગુણાય કપર્દિને ।
અતિસ્થૂલાય દેવાય હ્યતિસૂક્ષ્માય તે નમઃ ॥ ૧૩॥

ત્રિગુણાય ત્ર્યધીશાય શક્તિત્રિતયશાલિને ।
નમસ્ત્રિજ્યોતિષે તુભ્યં ત્ર્યક્ષાય ચ ત્રિમૂર્તયે ॥ ૧૪॥

ઇતિ મહાકાલસ્તોત્રં સમ્પૂર્ણમ્ ।

*Shri Mahakala Stotram*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*